PAPER - 4

# MT

2018 .... .... 1200 **Seat No.** ☐☐☐☐☐☐☐

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - IV**

**Time : 3 Hours** **Model Answer Paper** **Marks : 80**

| | | |
|---|---|---|
| | **प्रथमः विभागः - गद्यम् ।** | |
| उ.१. | **अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** | |
| १. | **अवबोधनम् । (केऽपि २ कृती कुरुत ।)** | |
| I) | उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।<br>देशविदेशेभ्यः पर्यटकाः आगच्छन्ति यतः **ते पक्षिविषये ज्ञातुमिच्छन्ति ।** | १ |
| II) | वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत ।<br>नैके खगाः अभयारण्यम् आगत्य वसन्तसमये वसन्ति । - **असत्यम् ।** | १ |
| III) | पूर्णवाक्येन उत्तरत ।<br>पक्षिमित्रैः वलयाङ्कनं **पक्षिणाम् अध्ययनार्थं** कृतम् । | १ |
| २. | **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)** | |
| I) | रिक्तस्थानपूर्तिं कुरुत । | १ |
| १) | त्रिशतषट्षष्टिमिताश्च - **त्रिशतषट्षष्टिमिताः + च ।** | |
| २) | देशान्तरादपि - **देशान्तरात् + अपि ।** | |
| II) | चतुर्थपदं लिखत । | १ |
| १) | जातिविशेषाः : विहरन्तः :: चमसचञ्चूः : **श्वेतः ।** | |
| २) | तृणस्थली : शुष्का :: वनम् : **विशालम् ।** | |
| III) | गद्यांशतः विलोमपदं लिखत । | १ |
| १) | अभिमानास्पदम् x **लज्जास्पदम् ।** २) निर्गत्य x **आगत्य ।** | |
| IV) | **द्रष्टुम्, ज्ञातुम् ।** | १ |
| ३. | **पृथक्करणम् । जालचित्रम् ।**<br>वासानुसारं पक्षिभेदाः → **वृक्षपक्षिणः**, **स्थलपक्षिणः**, **तृणपक्षिणः**, **जलपक्षिणः** | २ |

| | | |
|---|---|---|
| उ.१. | **ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** | |
| १. | **अवबोधनम् । (केऽपि २ कृती कुरुत ।)** | |
| I) | उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।<br>जनाः अधुना गृहे ग्रन्थान् न आनयन्ति यतः **अन्तर्जाले ग्रन्थाः उपलभ्यन्ते ।** | १ |
| II) | पूर्णवाक्येन उत्तरत ।<br>**नानाशास्त्रकलानां ज्ञानं, वैश्विकवार्ताः, विविधसंस्थानां विभागानां च संज्ञापनं, सहस्रशः ग्रन्थाः, पर्यटनार्थमुपयुक्तज्ञानमासनारक्षणं च, दूरस्थानां दर्शनं तैश्च सह संभाषणं, सामान्यज्ञानं चेति** समुपलभ्यतेऽनेन तन्त्रज्ञानेन । | १ |
| III) | वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत ।<br>सङ्गणकीयपत्रेण सन्देशप्रेषणं शीघ्रतया भवति । - **सत्यम् ।** | १ |
| २. | **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)** | |
| I) | गद्यांशात् विलोमशब्दान् चित्वा लिखत । | १ |
| १) | विलम्बेन × **शीघ्रतया ।** २) क्षयः × **वृद्धिः ।** | |
| II) | समूहेतरपदं लिखत । | १ |
| १) | विना, सह, ऋते । - **सह ।** | |
| २) | वरः, वचः, आशीर्वचः । - **वचः ।** | |
| III) | **अस्मासु, अन्तर्जाले, आर्थिकमन्दायने ।** | १ |
| IV) | सङ्गणकीयपरिभाषा संस्कृतप्रतिशब्दाः<br>E-mail **सङ्गणकीयपत्रम्**<br>Online Banking **सद्यस्क - कुसीदवृत्तिः** | १ |
| क) | **गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** | |
| १. | **अवबोधनम् । (केऽपि २ कृती कुरुत ।)** | |
| I) | उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।<br>बालनरेन्द्रः आत्मानम् अपराधिनम् अमन्यत यतः **तस्य हस्तात् च्युता भग्ना मूर्तिः तेन मार्गे एव त्यक्ता ।** | १ |
| II) | कः कं वदति ?<br>**माता नरेन्द्रं** वदति । | १ |
| III) | वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत ।<br>बालिका मन्दिरे खेलने मग्ना । - **असत्यम् ।** | १ |
| २. | **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)** | |
| I) | रिक्तस्थानपूर्तिं कुरुत ।<br>मात्रोक्तम् - **मात्रा + उक्तम् ।** | १ |

| | | |
|---|---|---|
| II) | गद्यांशात् पर्यायशब्दान् चित्वा लिखत । | १ |
| १) | ध्वनिना - **रवेण ।** २) वाहनम् - **यानम् ।** | |
| III) | समूहेतरं पदं चिनुत । | १ |
| १) | भग्ना, खण्डिता, पतिता । - **पतिता ।** २) विलोक्य, वीक्ष्य, आकर्ण्य । - **आकर्ण्य ।** | |
| IV) | विशेषण-विशेष्य - अन्वितिः । (मेलनं कुरुत ।) | १ |
| | भित्तिः **उन्नता** | |
| | सिद्धान्तः **महान्** | |
| ३. | **पृथक्करणम् । क्रमानुसारं लिखत ।** | २ |
| i) | मूर्तिक्रयणम् । | |
| ii) | अश्वयानदर्शनम् । | |
| iii) | बालिकारक्षणम् । | |
| iv) | मात्रोपदेशः । | |
| | **द्वितीयः विभागः - पद्यम् ।** | |
| उ.२. | **अ) पद्यांशौन् पठित्वा निर्दिष्टे कृती कुरुत ।** | |
| १. | **पृथक्करणम् ।** परोऽपि हितवान् → **बन्धुः** ; **अहितः बन्धु** → परः | २ |
| उ.२. | **ब) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।** | |
| १. | **शब्दज्ञानम् ।** | |
| I) | पर्यायपदं लिखत । | १ |
| १) | रजनी - **रात्रिः ।** २) प्रत्यहम् - **प्रतिदिनम् ।** | |
| II) | विशेषणे लिखत । | १ |
| | धर्मः - **सर्वसुखाकरः, हितकरः ।** | |
| २. | **अन्वयपूर्तिं कुरुत ।** | २ |
| | धर्मः सर्वसुखाकरः, हितकरः । **बुधाः** धर्मं चिन्वते । धर्मेण एव शिवसुखं समाप्यते । तस्मै धर्माय नमः । धर्मात् **अपरः** भवभृतां **सुहृद्** न अस्ति । धर्मस्य मूलं **दया** (अस्ति) । अहं प्रतिदिनं धर्मे चित्तम् दधे । हे धर्म, (त्वम्) मां पालय । | |
| क) | **द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** | |
| i) | ज्ञानेन **पुंसां सकलार्थसिद्धिर्ज्ञानादृते काचन नार्थसिद्धिः ।** <br> **ज्ञानस्य मत्वेति गुणान् कदाचिज्ज्ञानं न मुञ्चन्ति** महानुभावाः ।। | २ |

ii) अणुपूर्वं **बृहत्पश्चाद् भवत्यार्येषु सङ्गतम् ।** २
**विपरीतमनार्येषु यथेच्छसि तथा** कुरु ।।

iii) समुपागतवति **दैवादवहेलां कुटज मधुकरे मा गाः ।** २
**मकरन्दतुन्दिलानामरविन्दानामयं** महामान्यः ।।

ड) **वृत्तनाम चिनुत ।** १
(वंशभवो .......... महिमानम् ।।) अस्य श्लोकस्य वृत्तनाम **गीतिः** इति ।।

## तृतीयः विभागः - स्थूलवाचनम् ।

उ.३. अ) **गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**
१. **अवबोधनम् ।**
I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १
हिन्दी एव राष्ट्रभाषा भवेत् इति डॉ. आंबेडकरमहोदयस्य मतम् आसीत् । - **असत्यम् ।**

II) एकपदेन उत्तरं लिखत । १
**घटनासमितिप्रमुखपदम् ।**

२. **पृथक्करणम् ।** २




## चतुर्थः विभागः - लेखनकौशल्यम्

उ.४. **यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**
अ) **कथापूर्तिः ।**
**मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।** ५
शब्दानां माधुर्यं स्वर्गं प्रापयति कटुता च **नरके** पातयति । एक एव शब्दः जीवनं विभूषयेत् उतान्यः शब्दः जीवनं नाशयेत् । एकदा द्वयोः **धनिनोः** मध्ये विवादः उत्पन्नः। तौ न्यायालयं गतौ । तयोरेकः अचिन्तयदहं लक्षं **रूप्यकाणि** स्यूते स्थापयित्वा न्यायाधीशस्य गृहं गतवान् । न्यायाधीशस्तस्य मन्तव्यं ज्ञात्वा क्रुद्धोऽभवत् । धनिकोऽवदत् भोः, मत्सदृशाः लक्षरूप्यकाणां दातारः दुर्लभाः एव । न्यायाधीशः अवदत् लक्षरूप्यकाणां **दातारः** कदाचिदन्येऽपि भवेयुः परं लक्षरूप्यकाणां निराकर्तारः मत्सदृशाः अन्ये विरला एव । अतः कृपया **गच्छतु** ।

| | | |
|---|---|---|
| ब)<br>i) | **३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।**<br>**मम प्रिय कविः ।**<br>कालिदासः कविकुलगुरुः इति विख्यातः । भोजराजस्य राजसभायां कालिदासः राजकविरासीत्। तस्य विषये नैकाः दन्तकथाः प्रचलिताः । सः कालिमातुः प्रसादेन काव्यरचनाशक्तिं प्राप्तवान् इति जनाः मन्यन्ते । सः रघुवंशम्, कुमारसम्भवम् इति द्वे महाकाव्ये, मेघदूतम्, ऋतुसंहारम् इति द्वे खण्डकाव्ये तथैव अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम् मालविकाग्निमित्रम् च एतानि त्रीणि नाटकानि अरचयत् । उपमा-अलङ्कारस्य अतिसमीचीनोपयोगेन सः दीपशिखाकालिदासः इति उपाधिं लब्धवान् । तेनैव उपमा कालिदासस्य इति उक्तिः तस्य विषये प्रचलिता अभवत् । | ५ |
| ii) | **पर्वतः ।**<br>भारतस्य उत्तरस्यां दिशि देवतात्मा नगाधिराजः हिमालयः वर्तते । सः सदैव हिमेन आच्छादितः भवति । अतः तस्य हिमवान्, हिमगिरिः, हिमाचलः एतानि सार्थानि नामानि। हिमालये कैलासः, गौरीशङ्करः, काञ्चनगङ्गा, धवलगिरिः नाम्ना प्रसिद्धानि शृङ्गाणि । हिमालयात् गङ्गायमुनाब्रह्मपुत्रादयः नद्यः प्रभवन्ति । हिमालयस्य तलेषु निबिडानि अरण्यानि सन्ति । हिमालये नैकानि तीर्थक्षेत्राणि अपि सन्ति । हिमालयः भारतस्य नैसर्गिकः रक्षकः। | |
| iii) | **वृत्तपत्रमहिमा ।**<br>लोकसत्ताकपद्धतौ वृत्तपत्राणां स्थानं महत्त्वपूर्णम् । वृत्तपत्रैः मानवस्य सकलं जीवनं व्यापृतम्। प्रातःकाले यदि अस्य लोकमित्रस्य दर्शनं न भवति तर्हि जनाः व्याकुलाः भवन्ति । अज्ञानस्य, अन्यायस्य, मिथ्याज्ञानस्य च निवारणाय वृत्तपत्राणि सदैव सिद्धानि । सत्यप्रचारः अपि वृत्तपत्राणाम् उद्दिष्टम् । वृत्तपत्राणां समाजप्रबोधनस्य कार्यम् अतीव असाधारणं महत्त्वपूर्णं च । आधुनिके काले वृत्तपत्राणि जनमतं घटयन्ति विघटयन्ति वा । दूरदर्शनात् वृत्तपत्रमहिमा प्रभावशाली खलु । | |
| क) | **संस्कृतानुवादः ।**<br>**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** | ५ |
| i) | वयं वृक्षस्य छायायाम् उपवेक्ष्यामः। | |
| ii) | अहं निबिडे अरण्ये व्याघ्रम् अपश्यम्। | |
| iii) | मम समीपे वस्त्रस्यूतः सदैव वर्तते। | |
| iv) | योग्यः आहारः शरीरस्य वर्धनाय आवश्यकः अस्ति / वर्तते। | |
| v) | वृक्षाः तेषां छायया पथिकान् आनन्दयन्ति । | |
| vi) | तव यशः नित्यं वर्धताम् । | |
| vii) | क्रोधः मृदुवादेन शाम्यति । | |
| viii) | खगाः वृक्षाणां शाखासु नीडानि रचयन्ति । | |

| | | |
|---|---|---|
| ड) | **वाक्यरचना ।** | |
| i) | धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । | ३ |
| १) | माता शिशुं **सङ्कटात्** रक्षति । | |
| २) | सज्जनाः **न्यायमार्गात्** न विरमन्ति । | |
| ३) | गुरुः **शिष्येभ्यः / शिष्येषु** ज्ञानं वितरति । | |
| ४) | माता **गणेशाय** मोदकम् समर्पयति । | |
| ii) | अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । | २ |
| १) | **ग्रामात्** दूरं पाठशाला अस्ति । | |
| २) | **देशस्य** कृते सैनिकः प्राणान् त्यजति । | |
| ३) | **अध्ययनं / अध्ययनेन / अध्ययनात्** विना ज्ञानम् अशक्यम् । | |
| ४) | **गृहं** प्रति बालकः धावति । | |

**पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।**

उ.५ **यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

अ) **क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | परोक्षः भूतकालः | वर्तमानकालः | प्रथमः भूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| क्षिप् ६ प.प. | **क्षेप्स्यति** | **चिक्षेप** | क्षिपति | **अक्षिपत्** | क्षिपतु | **क्षिपेत्** |
| दा ३ आ.प. | **दास्यते** | **ददे** | **दत्ते** | अदत्त | **दत्ताम्** | ददीत |

ब) **नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सप्तमी (स्त्री.) | **सर्वस्याम्** | सर्वयोः | **सर्वासु** |
| पञ्चमी | **त्वत्** | **युवाभ्याम्** | युष्मत् |
| तृतीया | त्वचा | **त्वग्भ्याम्** | **त्वग्भिः** |
| षष्ठी | **शशिनः** | शशिनोः | **शशिनाम्** |

क) **धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| **उप्ता**<br>**इष्टम्** | **श्राव्यः**<br>**स्मरणीयः** | **ज्ञातवती**<br>**श्रुतवान्** | **जानन्**<br>**मुञ्चन्ती** |

ड) **समासाः ।**
**कोष्ठकपूर्तिं कुरत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | समस्तपदम् | समासविग्रहः | समासनामानि |
|---|---|---|---|
| i) | विपक्षः | विरुद्धः पक्षः । | **प्रादि तत्पुरुष** |
| ii) | **सुखदुःखे** | सुखं च दुःखं च । | इतरेतर द्वन्द्व |
| iii) | नीलकण्ठः | **नीलः कण्ठः यस्य सः ।** | बहुव्रीहि |
| iv) | **अनासक्तिः** | न आसक्तिः । | नञ् तत्पुरुष |
| v) | मधुपाः | मधु पिबन्ति इति । | **उपपद तत्पुरुष** |
| vi) | **सचिन्तः** | चिन्तया सहितः । | सह बहुव्रीहि |
| vii) | पञ्चखट्वी | **पञ्चानां खट्वानां समाहारः ।** | द्विगु |
| viii) | दुर्गादेवी | **दुर्गा नाम देवी ।** | कर्मधारय |

इ) **वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) **यदि / यदा दैवं दुर्बलतां गतं तर्हि / तदा** तृणमपि प्रायेण वज्रायते ।
ii) **अहं** चीवरम् **उपयोजितवान्** ।
iii) **अहं** कीर्तिकथाः **स्मरामि** ।
iv) **भवती** विजयिनी **भवतु** ।

फ) **सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) मार्गे **चत्वारि** वाहनानि सन्ति ।
ii) वर्षस्य **द्वादश** मासाः भवन्ति ।
iii) मया **एकवारं / एकदा / सकृत्** विदेशयात्रा न कृता ।
iv) गीतायाः **अष्टादशः** अध्यायः मया पठितः ।

## षष्ठः विभागः - अनुवादकौशल्यम् ।

उ.६. **अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

Once, दुर्बुद्धि (stupidity) asked सुबुद्धि (wisdom), who was overjoyed, "What is the secret of your joy and peace?" Wisdom said, "Friend, I have four bodyguards. The first one is, indeed, 'truth', which always protects me from a crime/mistake. Second one is 'affection'; I treat all employees like my sons. The third one is 'justice' which protects me from injustice. The fourth one is 'sacrifice' that motivates me towards charity. Hence, with the assistance of these, I always live happily, and do benevolance (social welfare)." दुर्बुद्धि (Stupidity) fell at his feet with respect/faith.

| | | |
|---|---|---|
| ब) | संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत । | ४ |
| १) | Only that advice is the best advice, which is for protecting the gain of the past, making acquisitions in the future and for liberating one facing calamity. | |
| २) | I feel that the hearts of the virtuous alone are extremely tough; they are not broken (pierced/hurt) even a little, by even the sharpest of the oral arrows (criticisms) of the wicked. | |
| क) | संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।<br>King – In that case, go ahead with your argument.<br>Queen – If you ask me, I don't like their argument at all.<br>गणदास – Madam, you may not consider me, an equally intelligent one, to be disrespectable.<br>Jester – Madam, I see a ram-fight (this quarrel is futile). What's the benefit of giving wages in vain? (What's the use of paying?<br>Queen – Indeed you like arguments. | ४ |

** ** ** ** **